7. Hafta

# चैत्रो मैत्रश्च

रामतीर्थस्य चैत्रो मैत्रश्चेति द्वौ शिष्यौ आस्ताम्। तौ गुरोः गृहस्य समीपे द्वयोः कोष्ठयोः न्यवसताम्।

एकदा गुरुः तयोः परीक्षार्थं ताभ्यामेकैकं रूप्यकं दत्त्वा अकथयत् - ‘इदमत्यल्पं धनम्। तथापि येन युवयोः कोष्ठौ पूर्येयातां तादृशं किमपि वस्तु क्रीत्वा आनयतम्’ - इति।

चैत्रः सद्य एव कस्यापि कृषीवलस्य गृहं गत्वा तेन धनेन पलालं क्रीतवान्। ततः स स्वयमेव तदानीय तेन कोष्ठं पूरयित्वा गुरवे न्यवेदयत् - ‘आर्य! पूरितोऽयं कोष्ठः’-इति। गुरुः सविषादं शिरः कम्पयन् ‘सत्यम्’ इत्यवदत्।

मैत्रः विपणिं गत्वा दीपमेकम् आनयत्। स तं प्रज्वाल्य कोष्ठे निधाय गुरवे न्यवेदयत् -‘आर्य! पूरितोऽयं कोष्ठः’ - इति। गुरुः सहर्षं शिरः कम्पयन् ‘सत्यम्’ इत्यवदत्। ततः प्रभृति उपाध्यायस्य मैत्रे प्रीतिरवर्धत। पश्यत! मैत्रस्य बुद्धिकौशलम्।